Review of the Sanskrit Poem
"ChitraNaishadham" in Samskrta Pratibha
(Published by Sahitya Akademi)
Oct-Dec 2016

च ावाहतवताात भात।

(राधावल्लभः )

★★★

**5.चित्रनैषधम्-खण्डकाव्यम्, शङ्करराजारामः, अङ्कुरनागपालकृत-हिन्दीभाषानुवादसहितम्, प्र. निरामय पब्लिशिंग सर्विसेज, मुम्बई, 2016**

अस्मिन् खण्डकाव्ये शङ्करराजारामेन हंसप्रेषितकम्, वैदर्भीदर्शनम्, वीरसैनिदौत्यम् वैदर्भीविवाह इति संज्ञप्तेषु चतुर्षु सर्गेषु नलदमयन्तीकथा निबद्धा। साकल्येन चतुर्षु सर्गेषु 216-श्लोकाः सन्ति। समग्रं काव्यं गोमूत्रिकाबन्धे निबद्धमिति विशेषः। यद्यपि चित्रकाव्यशैल्यां सम्पूर्णान्यपि कीचकवध- नलचरित्रादिखण्डकाव्यमहाकाव्यानि भूयसा प्राचीनमहाकविभिः विरचितानि, परन्तु गोमूत्रिकाबन्धे विरचितं समग्रं काव्यमिदमेव प्रथममिति कवी राजारामः एतस्य ऐदम्प्राथम्यस्य कृतेऽभिनन्द्यः। निर्व्यूढेष्वपि गोमूत्रिकाबन्धेषु शङ्करराजारामस्य कवितायाम् उज्ज्वलः सौन्दर्यबोधः, प्रसादरम्या



ऋचनावली, रसनिष्यन्दिकाव्यनिर्माणक्षमत्वं भावप्रवाहः वर्णनचातुरी च न हीयन्ते। नववध्वा दमयन्त्या वर्णनमिदं रस्यताम्-

हरिद्रानिर्मितालेपा शुद्धस्नानरसाप्लुता।
भूरिह्रीनिह्नुतालापा वृद्धस्त्रीनर्मसात्कृता।।
जलार्द्रचिकुरोपात्तसुजातागरुधूपना।
लीलारुचिभरोन्मत्तनिजानुगवधूजना।
स्फुरन्नवप्रभाजाला स्तोकहासाञ्चिताधरा।
शारदीव शुभा वेला नैकहंसाञ्चिताम्बरा।।
दीक्षाप्रतिसरोन्मीलल्लीलावलयभासुरा।
लाक्षाव्यतिकरोद्वेलविलासलटभाधरा।
कन्दर्पदीपकोत्तालज्वालाप्रायललाटिका।
सौन्दर्यदीर्घिकोल्लोलतुलाश्रयकलापका।
रशनालङ्कृतश्रोणी नेत्रार्पितशुभाञ्जना।
आशयालम्बितक्षोणीसत्रामतनुभावना।।
विकासोन्मदमन्दारपुरस्कारप्रदालका।
चकासन्मञ्जमुञ्जीरधुरन्धरपदान्तिका।
आल्या चैव कलावत्या धृतसौवर्णदर्पणा।
कल्याणावहलालित्या कृतदेवप्रदक्षिणा।
प्रापद्यत प्रियाकारा मुदितामरमण्डलाम्।
भूपस्य तनया धीरा वेदिकामथ मङ्गलाम्।। 4.36-44

परिशिष्टे पञ्चमे सर्गे कविचरितनिरूपणम्, गोमूत्रिकाबन्धचित्राणि च योजितानि। यथैवोत्कृष्टं काव्यं तथैव रमणीयं मुद्रणमस्येति दिष्ट्या सुरभारती वर्धते ।

(राधावल्लभः)

★★★